CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीकामाक्ष्यै नमः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



श्रीभगवत्पादेभ्यो नम.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

श्रीशतश्लोकीशङ्करविजयः
श्रीकामाक्षीविजयविलासदशकश्च

ग्रन्थकर्ता

ति० रा० महालिङ्गशर्मा

विश्रान्तसंस्कृतप्राध्यापकः

पच्चैयप्पमहाविद्यालयः

मद्रपुरी

भारतीय विद्या भवन
नई दिल्ली
श्री/श्रीमती/कुमारी.....
को.....परीक्षा.....में
उत्तीर्ण होने पर पुरस्कृत की गई
संचालक
.....

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मूल्य २.००



जैनेन्द्रमुद्रणालयः
वंगलोमार्गः
जवाहरनगरम्
दिल्ली–७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञापना

॥ श्रीः ॥

आस्तिकाः सहृदयाः,

अयोध्या मथुरा माया काशी काञ्चीह्यवन्तिका ॥
पुरी द्वारवती चैव सप्तैताः मोक्षदायिकाः ॥

सप्तसु मुक्तिप्रदेषु क्षेत्रेष्वन्यतमे श्रीकाञ्चीपुरे विराजमानायाः श्रीकामाक्षीदेव्या आलयं नवीकृत्य समतीते सुभानुवत्सरे पुष्यमासे कुम्भाभिषेकं यथाविध्यकार्षुः श्रीकामकोटिपीठे विराजमानाः श्रीशंकराचार्यपादाः। तदानीं काञ्ची-पच्चैयप्पकलाशालासंस्कृतपण्डितभूतोऽहं आचार्यकृतकुम्भाभिषेकं, देव्याः समर्पित=अलङ्कृतरजतरथोत्सवं च समीक्ष्य भक्तिवशो भूत्वा कामाक्षिविजयविलासदण्डकं व्यरचयम्। अत्र दण्डके देवीवर्णनं कामकोटिपीठाधिपानां देव्यालायस्य च सम्बन्धः रजतरथोत्सवश्च वर्णितः। अस्मिन्विषये च कामाक्षीविलासः क्षेत्रपुराणं ललितोपाख्यानादि देवीपरा ग्रन्थाश्च अर्थतः संगृहीताः। शतश्लोकीशङ्करविजयः—तस्मिन्नेव वर्षे चैत्रमासे काञ्चीपुर्यां देव्यालये श्रीशंकरजयन्तीमहोत्सवः श्रीकामकोटिपीठाधिपैरनुष्ठितः तदानीमयं ग्रन्थः कृतः। अयं च चतुःसर्गात्मकः। शतश्लोकपरिमितः। सर्वशंकरविजयसंग्रहश्च।

श्रीकामाक्षीदेव्या आदिशंकरस्य तत्पीठगानां च सम्बन्धबाहुल्यात् उभावपि ग्रन्थौ सहैव मुद्रितौ। यथा पठितॄणां देवीभक्तिराचार्यभक्तिश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृद्धिं प्राप्नुयादिति । अनयोर्ग्रन्थयोः मुद्रापणविषये साहाय्यमाचरितवतां महाशयानां हृदयपूर्वाः धन्यवादाः समर्प्यन्ते ।

१. कोयम्पुत्तूर् न्यायवादिनः मीनाक्षिसुन्दरार्याः ।

२. कल्की-सदाशिवार्याः ।

३. प्रा० शङ्करनारायणार्याःसंचालकाः भारतीय विद्या भवनम् ।

कामाक्षीं करुणापूर्णां काञ्चीनगरनायिकाम् ।
एकाम्रनाथतरुणीं प्रणौमीष्टाभयप्रदाम् ॥ १ ॥

श्रीकाञ्चीमुविराजमानमधुना श्रीकामकोट्याह्वयं
रूढाः सिंह्ममहासनं विधिवन्मूर्धाभिषिक्ता अपि ।
आचार्याः प्रतनाश्च नूत्नगुरवः राजन्त एते कलौ
कुर्वन्तः सततं स्वशिष्यनिवहान् सद्धर्ममार्गाश्रितान् ॥ २ ॥

शमादिषड्गुणाजलधीन् उमारमणसपर्याविशेषरतान् ।
श्रीचन्द्रशेखरेन्द्रात् परसरस्वतीन् यतीन् वन्दे ॥
श्री जयेन्द्रसरस्वतीन् नव्यान्निगमान्तसारज्ञान् ।
चिरन्तनभारतधर्मवेत्तॄनुपदेष्टॄन् नतोऽहम् ॥ ३ ॥

भारतस्य गणतन्त्रदिवसः
२६, १, ६९

ति० रा० महालिङ्गशर्मा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

शतश्लोकीशङ्करविजयः

कामकोटिपीठगैर्यतीश्वरै रयञ्जन-
श्चोदितश्चरित्रमादि-शङ्करस्य संग्रहात् ।
वक्तुमद्य चोद्यतः खखेन्दुपद्यसंख्यया
वाग्विलासमीडिता सरस्वती-ददातु मे ॥

(वसन्ततिलका)

वर्षश्चकास्ति भुवि भारताख्यो
यं प्रोन्नतो हिमगिरिः समकालटिश्च ।
कामं विभूषयत उत्तरदक्षिणास्थौ
यावाप्नुतां शिवगुरुत्ववरेण्ययोगम् ॥ १ ॥

तं कालटिं द्विजवृतं ननु केरलस्थं
पूर्णानदीवलयितं फलपुष्पवृक्षम् ।
धर्मी गुणी शिवगुरुर्विसुतोऽध्यवात्सी-
दीशोऽपि यं स चकमे पितरं महान्तम् ॥ २ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भार्यास्य धर्मनिरता कुलभूषणाभू-
दार्येति सच्चरितरुढसुनामधेया ।
गर्भं दधार पुरुषाज्जगतां हिताय
भक्तिः सुबोधमिव या सुषुवे कुमारम् ॥ ३ ॥

बालस्य वीक्ष्य मुखमुन्नसकञ्जनेत्रं
मन्दस्मितेन ललितं स्फुटभाषणं च ।
श्रुत्वा प्रमोदभरणाक्षममर्त्यकायं
त्यक्त्वा पिताऽथ जगृहे ननु देवभूयम् ॥ ४ ॥

आर्या पुनः पतिवियोगजवह्नितप्ता
दुःखं निगृह्य हृदि भर्तृपदानुगापि ।
दृष्ट्वा शिशुं स्वतनयं भुवि नान्यबन्धुं
तत्पोषणैकनिरताऽभवदप्रमत्ता ॥ ५ ॥

पुत्रस्य सामतिमयस्त्ववलोक्य वर्षान्
पूर्णानथो चतुर आर्यपथे निपुणा ।
आचार्यपूर्वमुपनीय सुतं सुवाचं
साऽध्यापयद्विधिवदेनमनन्यकार्या ॥ ६ ॥

लोके च मानवतया कृतजन्मनोऽपि
श्रीशङ्करस्य विदुषोऽखिलवेदधाम्नः ।
विद्यार्थमन्यगुरुसेवनपूजनाद्यं
तद्बोधनाय गुरुणा सफलेति विद्या ॥ ७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यश्चाष्टमे वयसि वेदषडङ्गवेत्ता
विद्यागुरोरनुमतिं समवाप्य पूज्यम् ।
स्वां मातरं परिचरन्त्स दिनैः कियद्भिः
सन्यस्तुकाम इह मातुरियेष चाज्ञाम् ॥ ८ ॥

यावन्न सा तमनुमन्यत एकपुत्रा
वृद्धा विशिष्य निरतास्य हि भाग्यवृद्धौ ।
एकाकिनी न सहते विरहं जनित्री
तावत्सनिश्चितिमनास्तनुतेऽप्युपायम् ॥ ९ ॥

अन्येद्युरेष जननी सहितः प्रभाते
स्नातुं नदीमवतरंस्तु गृहीतपादः ।
ग्राहेण भीत इव सोऽभिनयन्नुवाच
पश्याम्ब ! तेऽद्य विपदं महतीं सुतस्य ॥ १० ॥

यद्येष ते प्रियतरोऽपि परित्रजेयं
मुञ्चेदिमं झटिति पादमिमं वराकः ।
हन्याच्च नो यदि तदिच्छसि जीवितं मे
मातर्विधत्स्व तव चानुमतिं विमोक्षे ॥ ११ ॥

श्रुत्वेरितं स्वतनुजस्य ददावनुज्ञां
सन्यस्तुमेव जननी सभया वधाच्च ।
बालोऽपि नक्रवदनाद्विषयाच्च मुक्तो
ग्रामात्ततो जिगमिषुर्जननीमवोचत् ॥ १२ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृद्धां सुतः स्वजननीं प्रविहाय यास्यन्
अम्बा त्वया न खलु निन्द्य इतीह भाषे ।
पुण्यं महत्तव वसात्र सबन्धुमित्रा
संस्मारितोऽन्त्यसमयेऽहमुपागतः स्याम् ॥ १३ ॥

निर्गत्य बालकयतिः स्वगृहान्महौजाः
ज्ञानोपदेशनिपुणं स्वगुरुं विचिन्वन् ।
पद्भ्यामटंस्तत इतश्च वनानि देशान्
रेवातटं यतिवरैः श्रियमाविवेश ॥ १४ ॥

तेषां मिथस्तु वदतां वचनं निशम्य
बालो यतिर्गुरुवरं गिरिकन्दरस्थम् ।
गोविन्दपादयतिमप्रतिमं च बुद्ध्वा
तं चोपसृत्य विनयेन समं ववन्दे ॥ १५ ॥

निष्ठात ईषदिव विच्युतचित्तवृत्ति-
र्बालं तथागतमपूर्वतया विलोक्य ।
कस्त्वं कुतो भवसि किं च चिकीर्षितं ते
ब्रूहीति तं स भगवान् यतिवर्य आह ॥ १६ ॥

आकर्ण्य वाचममलाममृतायमानां
श्रीशङ्करो गदितवानिदमानुपूर्व्या ।
भूम्यादि भूतनिवहो न च खानि हृद्वा
प्राणाश्च देहमपि वा शिव एव सोऽहम् ॥ १७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति वदति सुतत्त्वे बालकेऽस्मिन्यतीन्द्रः
सपदि विगतशङ्कः शङ्करं निश्चिकाय ।
सकुतुकमथ वाक्यैर्वेदमूर्ध्नि स्थितैश्च
व्यतनुत किल तस्मै ज्ञानदीक्षां क्रमेण ॥ १८ ॥

इति श्रीशंकरविजये गोविन्दपाददर्शनं नाम प्रथमः सर्गः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयः सर्गः

मन्दाक्रान्ता

श्रीगोविन्दात्समुपगतवाञ्छंकरोऽद्वैततत्वं
वेदान्तानामविधिपरतां हेतुनैवोपदिष्टः ।
ज्ञात्वात्मानं त्वगुणमजडं व्यापिनं सन्तमेकं
कस्मादस्मिन् गुरुवर परे मोहिता इत्यपृच्छत् ॥ १ ॥

बालेनाथो निगदितमसौ श्रोत्ररम्यं निशम्य
रेवापूरं निनदसहितं स्तम्भितं वीक्ष्य कुम्भे ।
शक्तं मत्वा वदति स गुरुः साशिषं गच्छ काशीं
अद्वैतात्मप्रकटनपरां ग्रन्थमालां कुरु त्वम् ॥ २ ॥

गत्वा काशीं तदनु यतिराट् ब्रह्मसूत्रस्य भाष्यं
वेदान्तानामतनुत ततः कृष्णगीतस्य चैव ।
ईयुः शिष्यास्त्वमितयशसं पद्मपादादिकाश्च
व्याख्यां दृष्ट्वा वचनपटवे व्यास आयुर्ददौ च ॥ ३ ॥

स्नातुं गङ्गां व्रजति यमिनि प्राप्तचण्डालवेषः
पन्थानं नो वितरति शिवः श्रोतुमिच्छन्वचोऽस्य ।
किं मे स्पर्शादशुचिरथ भोर्देह एषोऽस्य देही
पिण्डे भेदः क इति निपुणं व्याजहारान्त्यजोऽपि ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तच्च श्रुत्वा स तमपि विदन् व्याजतच्छन्नमीशं
आत्मानात्मप्रकटनपरैः पञ्चभिः श्लोकरत्नैः ।
प्रत्यब्रूत प्रकटितमहावैभवो विश्वनाथः
प्रीतो भूत्वा नयनविषयः प्राञ्जलिं त्वन्वगृह्णात् ॥ ५ ॥

ज्ञानादस्माद्भवति सुदृढाद् भेदशून्याच्च मोक्षो
ब्रह्मैवांह न पुनरितरः सच्चिदानन्दरूपः ।
इत्येवैषां निगमवचसामाशयो न्यायसिद्धो
युक्त्या चेति स्वमतकथने व्याप्रतोऽगात्प्रयागम् ॥ ६ ॥

भाट्टाञ्जेतुं कृतमतिरसौ कर्मठाञ्छब्ददेवान्
तेषामग्र्यं कुमरिलमथो द्रष्टुकामो यदाऽगात् ।
तावत्सोमुं गुरुपरिभवादात्तपापं तुषाग्निं
तोपाद्विष्टं विदितचरितं तूर्णमेत्याबभाषे ॥ ७ ॥

कस्मादेतं विशसि दहनं गाङ्गतः स्कन्दमूर्ते
वेदाः साङ्गा इह भुवि पुनः सप्रमाणाः कृतास्ते ।
जैना बौद्धास्तव हि सुवचो मार्गणैः संप्रविद्धा
भीता दैत्या इव विससृपुः पुण्यकर्मा कुतोऽघम् ॥ ८ ॥

आहाऽचार्यं त्वहमपि रिपोः शून्यवादस्य कर्तुः
शिष्योऽभूवं सुविदितमतोऽखण्डयं तस्य वादम् ।
तत्पापस्य प्रशमनकृते वह्निमध्याविशं च
शिष्टे कार्ये भवति गुणवान् मण्डनस्ते तु दृश्यः ॥ ९ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णे कृत्वा वचनममलं द्वैतमार्गस्य भेत्ता
नित्यात्मानं भवहरमुपादिक्षदस्मै यतिश्च ।
तस्माद्योगी वियति विचरन् मण्डनं तं दिदृक्षू-
रेवा यस्यां वहति रुचिरा प्राप माहिष्मतीं ताम् ॥ १० ॥

तस्यां पुर्यामवसदखिलैर्बन्धुभिः पुण्यकर्मा
देव्या वाण्या सरसगुणया सेवितो ब्रह्मणोंशः ।
भक्त्या व्यासं जिमिनतनयं तद्दिनेऽसौ निमन्त्र्य
श्राद्धं कुर्वन् पितुरथ यतिं वेश्मगं खादपश्यत् ॥ ११ ॥

आहापूर्वं यतिमुपगतं मुण्डितं मण्डनोऽपि
कोपाद्वीक्ष्य ज्वलितवदनः को भवान् वा कुतो वा ।
भिक्षाकांक्षी भवसि यदि ते दीयते तिष्ठ दूरे
मध्ये श्राद्धं न तव वशगो मोपरोत्सीः पुनर्माम् ॥ १२ ॥

ब्रह्मन् कोपं त्यज भज शमं नाहमर्थ्यन्नभिक्षां
अन्या भिक्षा भवति विमला शास्त्रवादाख्यया या ।
दद्यास्तां मे ससमयमिह प्राह योगी पुनस्तं
शास्त्रार्थे यो न जयति भवेदाश्रमी जेतुरेषः ॥ १३ ॥

मिश्रः श्रुत्वा गिरमथ यतेर्विस्मयाक्रान्तचेता
एंच्छद्वादं स्वयमपि तदा तापसाज्ञात एव ।
जायां वाणीं निगमविदुषां वादनिर्णायकत्वे
विप्रश्चक्रे विषयियमिनौ प्रारभेतां विवादम् ॥ १४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माध्यस्थ्यं सा वितरति यदा पञ्चषाणां दिनानां
वादे कश्चिन्न भवति जयी गेहिनीकार्ययुक्ता ।
एकैकामप्यतिपरिमलां कण्ठयोर्न्यस्य मालां
प्रोवाचेत्थं स तु जयति वो म्लायते यस्य सैषा ॥ १५ ॥

श्रीशङ्करः

ब्रह्मैवैकं सदखिलजगत्तस्य कार्यं तु मिथ्या
तध्येवात्मा भवति न भिदा ब्रह्मजीवात्मनोर्वा ।
स्वर्नं स्थायी स वदति यमी मोक्षसाम्राज्यहेतो-
स्तज्ज्ञातव्यं विषयविमुखैरेतदेवेति वेदाः ॥ १६ ॥

मिश्रः

स त्वप्राक्षीद्यमिनमयमी ब्रह्मसिद्धं त्वसिद्धं
सिद्धं तच्चेद्भवति च विधेरङ्गतामेव यायात् ।
नो वा सिद्धं किमथ विफलं कार्ययोगानवाप्त्या
वेदेपूक्तं सफलमपि चेत् तद्भवेत्स्वर्गतुल्यम् ॥ १७ ॥

इन्द्रादीनां त्विहगुणवतां वर्णनान्नैक ईश
सत्या सृष्टिर्वहति तटिनीवोद्गता वारिपूरा ।
भेदो दृष्टः स्वपरविषये स्वर्गमाहुश्च नित्यं
जीवात्मैक्ये स्वमतनियते नोऽधिकारी न धर्मः ॥ १८ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीशङ्करः

एतावत्त्वं समधिगतवान् यः प्रवृत्तौ स वेदो
नान्योऽस्तीत्थं किमयि ! भवता व्याससूत्रं श्रुतं वा ।
किं तत्रोक्तं तदुपनिषदां अर्थसन्देहहन्तृ
तस्मान्न त्वं स्वगुरुवचनैर्वेदशीर्षानवेहि ॥ १९ ॥

एतौ धर्मौ विषयफलयोर्भेदतो भिन्नमार्गौ
तस्मात्सिद्धं परमविकलं वेदशीर्षा वदन्ति ।
पुत्रो जातस्त इति वचनं सिद्धमर्थं व्यनक्ति
कार्यत्त्वात् स्वो व्रजति विलयं, तच्च सापेक्षमस्तु ॥ २० ॥

एको देवः सकलजगतां सन्नियन्ता न चान्ये
या तत्सृष्टिर्वहति ललिता स्वाप्नवत्कल्पितैषा ।
मिथ्या प्रोक्ता श्रुतिरपि तथा नेति नेत्याह तस्मात्
तत्प्राद्यर्थं निगमवचसां न्यायतश्चान्यवादः ॥ २१ ॥

भेदोऽबोधोद्भव इह जनं भीतिदश्चाप्यनादौ
संसारेऽस्मिन् क्षिपति पशुवन्नीयतेऽसावमर्त्यैः ।
सत्येवैक्ये श्रुतिषु विदिते शोकमोहादिहीनः
शान्तो योगी सुरपतिनुतं वेत्ति चानन्दधाम ॥ २२ ॥

उपरि न कृतवादं मण्डनं म्लानमालं
श्रुतिमतमितिवादी मस्करी तं विजिग्ये ।
अपि तु सरसवाणीं मिश्रपत्नी त्ववोचत्
यतिवर ! मम भर्ता नो जितो मण्डनेति ॥ २३ ॥

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

असौ कृतवती चतुर्मुखवधूश्च वादं पुन-
र्दिनानि दश सप्त चाजितयतिः कुमार्गं श्रिता ।
लतेन तरुमाश्रिता पवनवेगभग्नं कृशा
न जय्य इति सा ततः स्मरकलासु पृच्छां ददौ ॥ २४ ॥

इति श्रीशङ्करविजये मण्डनविजयो नाम द्वितीयः सर्गः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीयः सर्गः

उपजातिः

स शङ्करः कामकलासु दक्षां वाणीं तु जेष्यन्निदमब्रवीत्ताम् ।
यतिः किलाहं विषयेष्वसक्तः कं नाम ते प्रश्नमुदाहरिष्ये ॥ १ ॥

अतो विवादो विरमत्वयं नो मासादहं ज्ञातकलाविशेषः ।
त्वया समाभाष्य पुनर्विजेष्ये तं माऽनुमन्यस्व च देवि यान्तम् ॥ २ ॥

इतीरयित्वा सह शिष्यवर्गः संप्रस्थितो मण्डनमिश्रजायाम् ।
पुरात्तु निर्गत्य सचिन्त एव देशानटन् कुत्रचिदालुलोके ॥ ३ ॥

दिवं प्रयातस्य नृपस्य देहं भूमिं गतं बन्धुजनाश्रुजालैः ।
पुरोधसा सज्जितमन्त्यकार्यं तन्मारुताकम्पितवस्त्रमाल्यम् ॥ ४ ॥

विलोक्य तद् दूरत एव योगी तं पद्मपादं निकटस्थमाह ।
अयं च कायोऽमरुकस्य राज्ञः योगेन हीमं प्रविशामि सद्यः ॥ ५ ॥

तदस्य भूत्वा नृपतिः पुरस्य त्रिंशस्तिथाह्नां च सुखेषु सज्ञी ।
विहृत्य साकं प्रमदाजनैस्तु ज्ञात्वाऽहमेष्यामि कलां स्मरस्य ॥ ६ ॥

तदार्यवृत्ता यमिनोऽमलाः पूनर्यूयं हि सर्वेऽवहिताः शरीरम् ।
मदीयमेनत्सकलैः प्रयत्नैः संरक्षतात्रुपरिरेष्यामि तावत् ॥ ७ ॥

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथेति शिष्यस्य गणे प्रपन्ने श्रीशङ्करः प्राप्त समाधियोगः ।
स्वसूक्ष्मदेहेन विवेश राज्ञः कायं ततश्चापि बभूव चेष्टा ॥ ८ ॥

ततो नृपस्सुप्त इव प्रबुध्य राजा प्रजानां च मुदोदतिष्ठत् ।
क्रमेण शान्तिं विधिवद्विधाय मन्त्री नृपं राज्यगृहाननैषीत् ॥ ९ ॥

अथोपजज्ञे नृपवेश्मनीह नृत्तं प्रमोदाद्वनिता जनानाम् ।
सनिस्स्वनो मङ्गलतूर्यजः खं व्याप्नोत्तथाशा जयशब्दपूर्वम् ॥ १० ॥

गुरौ यतौ शासितरि प्रजानां भूमिः ससस्या फलवांस्तरुश्च ।
प्रजाः पुनर्धर्मपरा नितान्तं प्रीत्या च भक्त्याऽन्वसरन्तमेव ॥ ११ ॥

न पक्षपातो न विरुद्धवादो नादण्ड्य दण्डो न च लोभवार्ता ।
समं प्रजाः पालयतो नृपस्य वैरी पुनर्नो गुणशक्तिमत्वात् ॥ १२ ॥

इति प्रजारञ्जनतत्परोऽसौ धर्मार्थयुक्तः प्रविभज्य कालम् ।
निशासु रामाभिनिविष्टचेता रेजे सदेहीव नृपस्त्रिवर्गः ॥ १३ ॥

दिनेषु यातेष्वथ मन्त्रिवर्यः संप्रेक्ष्य भूपं निरतं त्रिवर्गे ।
मतौ च जीवोपममार्यवृत्तं मेने तमन्यं न तु पूर्वराजम् ॥ १४ ॥

भवेत्स योगी सकलार्थवेत्ता देहं स्वयोगान्नृपतेः प्रविष्टः ।
तथापि राज्ञो महिषीर्विचार्य कर्तोस्मि लोकस्य हिताय कार्यम् ॥ १५ ॥

अमात्यमुख्यस्त्विति जातमेनं राज्ञ्यै रहः संशयमब्रवीत् सः ।
तदिङ्गिताकारगुणज्ञयापि भिन्नोऽयमित्येव पुनर्ज्जवेदि ॥ १६ ॥

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निशम्य चेदं सचिवः सचिन्तो निर्विण्ण एषोऽपि भवेदकस्मात् ।
शरीरमात्मीयमवाप्नुयाच्चेत् राजन्वती भूर्भविता ह्यनाथा ॥ १७ ॥

विचिन्त्य कर्तव्यमथाशु मन्त्री भृत्यानथाहूय समादिशच्च ।
यतो यतः प्राणविहीनदेहस्संदृश्यते तं दहताद्य यूयम् ॥ १८ ॥

ततस्तु भृत्याः शिरसा तदाज्ञां गृह्णन्त एव प्रविचेरुरुर्वीं ।
गुहागतं तच्च गुरोः शरीरं रक्षन्त ऊचुः सभयं मिथस्ते ॥ १९ ॥

गुरुर्गतो नो विषयानुषङ्गी त्रिशत्तथाह्नां गलिता तदुक्ता ।
न्यवर्ततायापि न देशिकेन्द्रो द्रागेव कैश्चित्स गवेषणीयः ॥ २० ॥

ततः परं छात्रवराः कियन्तो बद्धाशयास्तस्य पदं विचेतुम् ।
भूत्वाथ वेषेण कुशीलवानां देशान् सयत्नाः परितो विचेरुः ॥ २१ ॥

क्रमेण ते चामरुकस्य राज्यं भूमिंगतं स्वर्गमिवातिरम्यम् ।
ऋद्धं प्रजानां गुणसंपदा च संप्रेक्ष्य जग्मुस्त्वथ राजधानीम् ॥ २२ ॥

नृपः सभायां समवस्थितश्च दौवारिकेणेत्य तदा न्यवेदि ।
उपस्थिता देव दिदृक्षयाऽमी गीतप्रवीणास्तु कुशीलवास्त्वाम् ॥ २३ ॥

प्रवेशयेति प्रहितः स राज्ञा तान्सायकांस्तग पुरो निनाय ।
उपाविशन्दत्तसुखासनास्ते गीतं जगुश्चेदमवाप्यचाज्ञाम् ॥ २४ ॥

अये किमेवं कलहंस ! दूरे पद्माकरं यासि मृणालभक्षः ।
तवाद्य योगं वरटाततनुश्च हंसाम्बुजं जम्बुकिनोऽस्तमर्कः ॥ २५ ॥

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साभिप्रायमिदं कुशीलवकृतं गीतं स योगी पुनः
श्रुत्वा शङ्करमस्करी सरभसं निष्ठां गतस्तक्षणात् ।
सन्त्यज्याशु नृपस्य देहममलं यावत्स्वकं प्राप्तवान्
ईषद्दग्धमसौ विलोक्य नृहरिं तुष्टाव तापापहम् ॥ २६ ॥

इति श्रीशङ्करविजये अमरुकायप्रवेशो नाम तृतीयः सर्गः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थः सर्गः

रथोद्धता-वृत्तम्

शङ्करः स्मरकलासु कोविदो वन्द्यमानचरणः स्वमाणवैः ।
तां विजेतुमथ भारतीं पुनस्त्वन्तरिक्षपथमास्थितो ययौ ॥ १ ॥

मण्डनस्य गृहिणी यदैव तं वीक्ष्य वादकरणे गतस्पृहा ।
अभ्युपेत्य च यतेर्जयं दिवं गन्तुमारभत मन्त्रयन्त्रिता ॥ २ ॥

शारदेति भुवि मन्मठस्थिता पारदे च भववारिधेर्नृणां ।
ज्ञानदेति वरदेति चाभिधा सत्यमस्तु जय चेत्यभाणि सा ॥ ३ ॥

मण्डनं गृहसुखस्य खण्डनं मुण्डिनं व्यतनुतापि दण्डिनम् ।
यः सुरेश्वरसमाख्यायुतः शिष्यमुख्य गणनीयतां गतः ॥ ४ ॥

विप्रवर्यतनयं न भाषिणं मौनिनं च जडवच्च संस्थितम् ।
को भवानिति तमाह मस्करी सोऽप्यभाषत विहाय मूकताम् ॥ ५ ॥

ब्रह्मनिष्ठमवगम्य वाक्यतः शङ्करोऽस्यपितरं दयापरः ।
आह चास्तु तनयो ममान्तिके धात्रिहस्त इति शिष्यवर्गगः ॥ ६ ॥

जातुचिच्च तपसि स्थितं यतिं छद्मनऽथ तमतद्विदं रहः ।
याचते स्म च शिरोऽस्य हातको ह्यु ग्रभैरव इति प्रथां गतः ॥ ७ ॥

Digitized by eGangotri

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दैवतस्य यजनाय याचिते नात्मनः शिरसि जीविते तथा ।
निस्पृहो यतिरुवाच भैरवं निद्रिते स्वजन आशु नीयताम् ॥ ८ ॥

भैरवः स निशि खड्गमाहरन्यावदेनमुपयाति घस्मरः ।
पद्मपादमनसा समीडितस्तावदेत्य नृहरिर्जघान तम् ॥ ९ ।

शङ्करस्तदनु वीक्ष्य तं मृतं शिष्यहूत नृहरिं प्रतुष्टुवे ।
ज्ञातभैरवविचित्रमानसः प्रस्थितः सपदि दक्षिणां दिशम् ॥ १० ॥

क्षेत्रमुख्यकृतसन्निधिं परं नैकरूपसहितं गुणान्वितम् ।
नामरूपकरणैरथेश्वरं शंसति स्म यतिरेकतां ब्रुवन् ॥ ११ ॥

ग्रन्थरत्नकरणे नियोजितास्तेनपद्मचरणादयः पृथक् ।
ज्ञानबोधकममीवितेनिरे भाष्यसारपरमात्मवेदकम् ॥ १२ ॥

ऋष्यशृङ्गतपसे कृताश्रयं मारुताहृतविलोलभङ्गया ।
तुङ्गया वलयितं सुभद्रया देशमाप शरणं विपश्चिताम् ॥ १३ ॥

तत्र शङ्करगुरुः प्रयत्नतो शारदां विरचिते शुभासने ।
शक्तिभिश्चकृतवान्प्रतिष्ठितां पद्मपादयतिमेवमादिशत् ॥ १४ ॥

शारदामिह च वत्स पूजयेर्देवतां जनहिताय रक्षिताम्
पालयेर्निगमधर्ममादराच्छ्रावयेर्मम मतं गतस्पृहः ॥ १५ ॥

शङ्करस्तदनु मातृचिन्तितस्त्वन्त्यकालमवगत्य चाप ताम् ।
पञ्चतां गतवती मुदैव सा प्रापिता च हरिलोकमक्षयम् ॥ १६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजशेखरनृपं यतीश्वरः केरलीयमनुगृह्य चागतम् ।
रामसेतुमुखतीर्थसेव्ययं वाममार्गनिरतानखण्डयत् ॥ १७ ॥

काञ्चिभूमिमथ सेदिवानसावाम्रमूलमहिताश्रगम् शिवम् ।
कामकोटिमपि हस्तिरक्षकं भक्तिमान् यतिवरस्त्ववन्दत ॥ १८ ॥

आलयांस्तदनु कारयेत्यसौ राजसेनमवदत्तदानृपम् ।
मानयन् सतु वचोऽस्य भक्तिमान् आलयांश्च नगरं च निर्ममे ॥ १९ ॥

तेन तोषितमनाः स शङ्करो राजसेनमनुगृह्य भूपतिम् ।
चक्रमत्र परदेवताग्रतो न्यस्तवानखिलशक्तिमच्छ्रयः ॥ २० ॥

कामकोटिवरसद्मनि स्थितं सर्ववित्त्वविनिवेदकं मुदा ।
आरुरोह स सुपीठमूचिवान् एकतां च परमात्मजीवयोः ॥ २१ ॥

वेङ्कटाचलमुपेत्य शंकरस्त्वब्रवीद्विखनसो मतं गतान् ।
हन्त भोःश्रयत निश्चितं श्रुतौ ब्रह्मनिर्गुणमतोन्यदुज्झ्यताम् ॥ २२ ॥

एवमुत्तरदिशं ह्युपेयिवाञ्छंकरस्तु विषयान् बहूंश्चरन् ।
नैकभेदसहितं मतान्तरं खण्डयञ्छ्रुतिमतं ह्यरोचत् ॥ २३ ॥

सौरगाणपतशैववैष्णवस्कान्दशाक्तमतरूढमानसान् ।
युक्तियुक्तवचनैस्सै नगमैरेकतां च समतामबोधयत् ॥ २४ ॥

इति शिवो यतिरूपधरो धरां श्रुतिवचोनिकरैः स्वशरैः समम् ।
परिवृतो यतिभिस्स तु यष्टिभृत् त्रिरचर द्दनुजायितदण्डधृत् ॥ २५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्वैतं मतमुत्तमं च महता कालेन लीनं पुनः
संस्थाप्यैव कृती पुनः सगुरुराट् चक्रे मठान् दिक्ष्वपि ।
आचन्द्रार्कविराजमानसुयशः स्तम्भानिव क्ष्मापतिः
शिष्यांस्तांश्चतुरो न्यवेशयदिह ब्रह्मा यथालोकपान् ॥ २६ ॥

वेदोक्तानखिलान् धर्मनिवहान् संरक्षत श्रद्धया
नित्यं ध्यायत चात्मवस्तु परमं त्वीहाविहीनाः पुनः ।
पीठस्थामपि देवतां सनियमाः क्षेमाय लोकस्य ते
यूयं पूजयताद्य शिष्यसहिता इत्यादिशत्तान् गुरुः ॥ २७ ॥

काश्मीरस्थं प्रसिद्धं पुनरपि यतिराट् प्राप्य सर्वज्ञपीठं
जित्वा रुक्षाद्विवादे त्वहमहमिकयासङ्गतान्साख्यमुख्यान् ।
ग्रन्थांश्चाद्वैतमार्गप्रकटनसुलभान्ग्रन्थयित्वा बदर्यां
तस्माद्गत्वा स्वधाम प्रमथगणपतेः पञ्चलिङ्गनिलेमे ॥ २८ ॥

भूयोप्यागत्य लिङ्गत्रयमथ निहितं क्षेत्रमुख्येषु कृत्वा
भोगाख्यं यच्चलिङ्गं सविषयविमुखो न्यस्तवान् शृङ्गपुर्याम् ।
लिङ्गं तद्योगनाम्ना विदितमथ यतिः पीठगः कामकोट्याः
सर्वज्ञात्मा तु काञ्च्यां महयतु विधिनेत्याह शिष्यं सुरेशम् ॥ २९ ॥

ततः काञ्चीमेत्य प्रथमगणनीयो मतिमतां
सम ताभ्यां स्थित्वा जगति कृतकार्यो यतिपतिः ।
समर्चन् कामाक्षीं स विगलितबन्धोऽतिललितां
चिदाकारां तस्यास्तनुमधिवसन् भाति यशसा ॥ ३० ॥

Funding by IKS, MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति विरचितमेतच्छांकरं सच्चरित्रं
यतिवरचरितेभ्यः संगृहीतं नवं च ।
वितरतु पठितृभ्यो बुद्धिमात्मावबोधे
अमृतमिव पयोधेर्जातमत्यन्त सौख्यम् ॥ ३१ ॥

इति शंकरविजये दिंग्विजयो नाम चतुर्थः सर्गः ।

हरिः ओम् तत्सत्

ति० रा० महालिङ्गशर्मणा विरचितः शतश्लोकीशंकरविजयः सम्पूर्णः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कामाक्षीविजयविलासदशकः

विहरतु हृदि काञ्चीपुरे कामकोट्याख्यपीठप्रतिष्ठापिते देवि ते रूपम-
कृतकवचसां मृग्यमानन्दधामागमेषु प्रसिद्धातिचित्रस्वभावं पादयुगधृतवरा-
भीति रत्या च कामेन संपूजितं वाजितुण्डेन देवेन कलशजमुनये वार्धि
संपीतिने विन्ध्यगर्वापहर्त्रे च संसूचितं साधु ॥ १ ॥

यदपि सुविदितेनर्षिणा दुर्वाससाऽराधितं त्वत्र साकेतभर्त्रापि दशरथ-
नरपालेन पुत्रार्थमासेवितं धर्मदं धर्मिणां कामदं कामिनां चैव विषयविरति-
भाजामतिज्ञानिनां ईषणात्यागिनां योगिनां वीरशब्दान्वितानां च प्रभवति
परमानन्दरूपस्य नित्यस्य मोक्षस्य संधातृ तद्रुक्मवर्णं मनोहारि ॥ २ ॥

इयमिह हि महाक्षेत्ररत्ने बिलादुत्थिता लोकरक्षाकरी कामकोटीश्वरी
बन्धकाख्यस्य सुरधरणिसुरव्यूहविद्वेषिणो धर्ममार्गावमन्तुर्वधायावतीर्णापि
तुरगवदनदेवेन भक्ताय चागस्त्यनाम्ने स्वशिष्याय संप्रोक्तमत्रत्यदेवीं पुरस्कृत्य
विधिरपि ललितामाचचक्षे स कामाक्ष्युपाह्वां सपर्यार्थमङ्गीकृतानर्ध्यदेहां
सुरेभ्यश्च ॥ ३ ॥

निखिलजनमनस्तापकौमुद्यशेषर्षिहृत्पद्मिनी हंसिका काव्यधीपोषणेरंमदा
च नयकुशलनृपश्रीः सतां ह्रीः सुबुद्धिर्बुधानां नृणां तुष्टिरेषैव पुष्टिर्धृतिः
कीर्तिरुर्व्यां च सुकृतविरहितानां त्वलक्ष्मीः सदा जायते भीतितन्द्रा क्षु धा-
क्षान्तिरूपा त्वनादिः स्वतन्त्रा च जयति जयति कंपातटे वाङ्मनोऽगोचरा स्त्री
नवाना नकाञ्चीं परा रोचयन्ती रमा या च ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रचितकुमुदिनीबन्धुमूर्धावतंसाब्दमाला भवेण्यष्टमीचन्द्रफालारुणास्थास-
का कान्तकनकखचितरत्नावलीरम्यताटङ्ककर्णा मकर्यादिपत्राक्तगण्डस्थलाम्भो-
जनेत्री प्रचलनललितनासाविभूषा प्रवालाधरा मन्दहासोज्वला कुन्तसूनाङ्क-
राकारदन्तापि अनुपमचिबुका कम्बुकण्ठी स्वरालापमौनीभवत्कोकिला
हेमकुम्भस्तनी रत्नहारा च ॥ ५ ॥

कुसुमशरगृहोद्यानरूढातिमुक्ताह्वयीरुद् द्विषद्दोर्लता पल्लवारक्त
हस्तांगुलिर्नाभि जितनदसुषिरात्यन्तशातोदरी मुष्टिमेयावलग्ना पृथु-
श्रोण्युतोरुद्वयाकृष्टरम्भापि प्रपदयुगपराभूतकूर्मारविन्दाङ्घ्रिद्वयाहस्करद्योत-
संच्छिन्नभक्तान्धकारा च सुरमुनिवरवंद्या वदान्याऽरुणा नित्यतारुण्यसौभाग्य-
भोगान्विता ते नमः स्यात्तु कामाक्षि ॥ ६ ॥

नतजनशुभदा कामकोटी क्लिश्येयं रवीन्दुस्तना पोषयन्तीव माता
सती स्वात्मजातानि करतलकलितैः पाशकोदण्डबाणाङ्कुशैश्चात्मभक्ता-
न्नियन्त्रीव कामं सकोपं विहातुं च हृदयमपि तथा पुण्यपापाख्यगंधेन हीनं
सुनम्रं विधेयाच्च सत्ताविलीनं सदैवेति गरुडमणिसवर्णेन पाणौ धृतेनापि
कीरेण सा बोधयन्तीव चैक्यं चिदानन्दरूपे नु ॥ ७ ॥

अखिलभुवनरक्षाधुरीणेव चारूढसिंहासना नेतृभावं ब्रुवाणेव वाण्या
श्रिया चापि सततमुभयतो वीजिता चामराभ्यां अथोपात्तशुभ्रातपत्रा नुता
वीणया किन्नरीभिस्तु कनकखचितरत्नप्रभामण्डलैर्भक्तनेत्रोत्सवार्थैरनर्घैः
किरीटादिभूषाविशेषैश्च कटितलविलसत्कुङ्कुमाभेन वस्त्रेण चोद्भासिता
भाति पुण्यस्य राशिर्नु धर्मस्य सेतुर्नु ॥ ८ ॥

विलसति किल सा कल्पवल्लीव सर्वार्थदात्री पयोवाहमालेव संतोष-
दा नीलकण्ठस्य हृतबहुलतापापनाशैकदीक्षेव चाह्लाददात्री हराङ्गाहता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पावना चोष्णभानोस्तु तनुरिव बहुलध्वान्तभेत्री सुधेवामरत्त्वस्य नेत्री सुसन्ध्येव तेजोऽरुणा लोकवन्द्या च मुनिजनतपसांसिद्धिरेवात्र शम्भोः कृपायास्तुमूर्तिस्तथा केलिभूमिर्महाप्राणनाडिर्हि ॥ ९ ॥

पुनरमरधुनीवात्र देवी भवानी स्मृताघौघहंत्रीशमूर्ध्नाद्दतासौ यशोवी-चिरम्या च जनकनृपतिकन्येव रामाभिरामापि या रक्षसां कालरात्रिस्तथा द्रौपदीवाग्निजापञ्चपुरुषशयनगा पाण्डवानीकिनीवातिवीरेण भीमेन धानञ्ज-योद्धेतिवप्रेण गुप्ता च । नकुलनयवतो व्यासकीर्तियथा वेदशास्त्रेतिहासैः शुकेनापि विस्तारितास्तीह भूमौ च ॥ १० ॥

जलधरपटलैर्वार्पिकैर्विद्युतेवात्र गोरोचना श्रीमुषा वर्ष्मवल्ल्यायुता केशपाशैश्च दरदलितनवाब्जाच पूर्णेन्दुयुक्ता शरच्छ्रीरिवस्मेरवक्त्रेण लक्ष्मी-र्वसन्तस्य मूर्तेव मृदुभिरवयवैः पल्लवैरन्वितेवारुणैः पुष्पितेव स्रजां सा विभूषामणीनां प्रभाभिश्च भ्रमरवलयितेवाननालंबितैः कुन्तलैर्हैमवत्येव तप्ता तपोभिः प्रकृत्या तु शीतैव ॥ ११ ॥

मदगजमुखमातापि पञ्चास्यमान्या भवानी सतीयं भवस्यापहन्त्री स्वतेजोऽरुणा चापि भवति निरनुरागा निराधारभूता षडाधारमूला शिवा-ऽभक्तभीतिप्रदा कामकोटिस्तु मदनरिपुवधूः सा निराकारनित्यासगर्वा-स्वतन्त्रा च मायामनोज्ञा मनोदूरकार्याहि त्रिपुरवरनिवासा पुरारातिचेतः प्रतिष्ठा पुरंध्रिस्वरूपापिबाला कुमारस्य माता च ॥ १२ ॥

कथमिव वचनैर्वर्णयेद्देवि कामाक्षि लीलाविलासाञ्जनोवामनोऽयं फले प्रांशु लभ्ये सयत्नोहि स्मितलवहृतचेता हरो विस्मृतात्मानटत्यट्टहासं तनोत्याशयाभूतिमङ्गेषु चोद्भूलितां सोऽपि निवसति च गणैः साकमेषोऽस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकस्य रक्षाकृतेऽसेवतादौविषं भीमकर्मास्म हालाहलं द्राक्च गरलमपि गलेतस्य हे देवि माङ्गल्यभावेन ते तत्र संस्थापितं रक्षितः सोऽधुना यन्नीलकण्ठोऽस्ति ॥ १३ ॥

स्मरति न तव कामाक्षी मर्त्यः प्रकृत्या स्वरूपं तवेदंत्वजानान एवाद्य दारेषु पुत्रेषु वित्तेषु सक्तोऽस्ति यदि भवति मनस्तन्नरं शङ्करं कारयेस्त्वं कटाक्षेण तस्यापि वाचस्पतिः सेवकः किङ्कराः शक्रमुख्यानु गणयितुमयमर्हस्त्वया नैव किं पुण्यमेतेनपूर्वं कृतं शास्त्रमध्यैष्ट किं वेदवेदान्तभागेष्वधीतीति यमवति भवती कोऽनुयुञ्ज्यात्पुनस्त्वां जगत्सृष्टिसंस्था तिरोधानकर्त्रीजडः सूनुरिष्टोजनन्याहि ॥ १४ ॥

अभिरमयति काञ्चीभुवं ते यशः कामकोट्यम्बकामाक्षि या स्वीकृताशेषशक्तिस्वरूपा च सर्वेश्वरीभावमासाद्य भुवनशुभविधात्रीह विख्यातमेषास्वनाम्नासुरं बन्धकं योधकं विजित्यातिथिं मृत्यु सह्माशुनीत्वा जयस्तम्भमरचयद धिकाञ्चि प्रसिद्धं पुरा चापि भूत्वाहनद्दुर्गमाख्यं रक्षांसि चान्यानि या चण्डिकाह्वा सुरेड्या पराऽतोऽपि । सुललितललिताया वपुः प्राप्य देव्या खलो भण्डकाख्यः प्रचण्डोभुवो धूमकेतुर्हतो दानवानां सकेतुः सवर्गश्च ॥ १५ ॥

वरमणिसदने श्रीयुते कामकोटीसुपीठेऽत्रकाञ्च्यां चिराद्देवदेवैर्मुनीशैर्नरेशैर्नुता पूजितेयं विशेषाच्च तुण्डीर विषय वसति भाग्भिर्विशुद्धान्तरङ्गैर्जनैर्वर्णजात्याश्रमादिप्रभिन्नैश्च मातेव चाभ्यर्हितास्वात्मजेवाहता प्रेमयुक्तैश्च य इह गुरुवरोपात्तमन्त्रार्थतत्वावबोधैकसक्तास्तु ते साधकास्तामिमां देवतां संविदो रूपिणीं सत्तया पूरुषस्येह स्फुरणाचलन-

Funding by IKS Division

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संभाविनीं शक्तिमाहुश्च मायां परे प्राक्तनैः सत्वमुख्यैर्गुणैरन्वितां चेतरे सच्चिदानन्दसन्दोहदेहात्मिकां ब्रह्म ॥ १६ ॥

कुलगिरितनयावाससंरूढशोभामिमां क्षेत्रमुख्येषु मुक्तिप्रदान-प्रसिद्धेषु सिद्धा मनन्यात्मकत्वेन चैकाम्रनाथेभरा जादि विविधसुरवरागार चप्रप्रगाढां महागोपुरैश्चापि विभ्राजमानां सुरथ्याविशालां पुरीषु प्रकृष्टा-मथाङ्गैः प्रधानैश्च देवैस्तु वलयितनवसालं परायाः श्रियश्चक्रमद्रणोः प्रदिष्टं यथा भासमानां द्विजैर्धर्मनिष्ठैस्तथाऽन्यैश्च भक्तिप्रयुक्तैर्नरैर्मेदुरां विन्दुविलसितजननीमन्दिरां कामकोटीसुपीठेन जुटां च काञ्चीं पुराद्वैत-विद्योपदेष्टारईशां शिनः शङ्कराचार्यपादाः समापुर्हि ॥ १७ ॥

अवगतपरमात्मस्वरूपाः कृताद्वैतभाष्यादिका मातरं कामकोटि-प्रणम्यात्र वेदान्तवाक्यैकतत्वे परब्रह्मजीवैक्यवादे विरुद्धानीह श्रुतिगत-वचसांहेतुशून्यानि यान्यत्र चासन्मतावेशभाजां तु वाक्यानि तानि स्मसद्धेतु-युक्तैर्वचोभिर्निराचक्रुराचार्यवर्यामहान्तो हि जितसकलविपक्षास्तुते शङ्करा-चार्यपादा गिराऽमर्त्यया कामकोट्येव चाज्ञापिताः पीठमारूढवन्तोऽत्र सर्वज्ञ-नाम्ना प्रसिद्धंपराशक्ति गृहवरगतमेतेऽपि तुण्डीरभूपेन भक्त्योपपन्नेन निर्माय काञ्चीं सभूदेवदेवेशगेहां च दुर्वाससः कल्पकृप्पाहणामीडिरे-ऽवां तु ॥ १८ ॥

तदनुगुरुवराश्चात्मविद्याप्रचारे नियुक्ता विजेतुंगतास्तत्र तत्रश्रुतेः संमतं दिग्तु विख्याप्य चाद्वैतमार्गंहितं षण्मतस्थापनव्याजतश्चापि परम-पुरुषरूपस्य चेदं चिदाकारनित्यस्य भेदेन हीनं स्वरूपं गुणैश्चैवभिन्नं विभा-तीति भक्तांस्तु ते बोधयित्वा श्रुतीश्चनेह नानेति इह य उदरमित्यादिकाः संशयघ्नीर्ददानास्तथाद्वैतभेरीं समुद्घोषयन्तः पद्मपादादिशिष्यांश्चतुर्दिङ्मठेषु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिष्ठापयन्तः कृतार्थाश्च अनतिसुलभकीर्तिप्रवाहोर्मिमालापवित्रीकृताशाश्च सर्वज्ञपूर्वात्मनाम्नावसन्कामकोटीसुपीठाधिपेनापि काञ्चीं सुरेशेनभूरत्न-काञ्चीं हि ॥ १६ ॥

विगलितममताबन्धनाः शोभनाः श्रीमदाचार्यपादा यदा योगयुक्ता-स्तनौकामकोट्यास्तु लीनास्तदारभ्य यत्कामकोट्यालयस्यापिपूजादिकं तच्च तत्पीठ गतवरयतिभिः कार्यतेऽनुक्रमात्प्राक्च संवत्सराणां शतात्पूज्यपादा तत्सुपीठंगताः केचनाचारिषुर्मातृगेहस्य कुम्भाभिषेकंत्विदानींतनाः पूत चरणासरसिजाः कामकोटीसुपीठाधिपा ज्ञानमार्गोपदेष्टारएत्येह काञ्ची-मतीते सुभानावमी तिथ्यमासे नवीकृत्य देवालयं मण्डपैर्गोपुरैश्चापि सहितमथसुसालैर्महेशीं यथाशास्त्रमभ्यर्च्य कुम्भाभिषेकंह्यकार्षुर्महाराज-साध्यं त्वनायासमेवात्र पात्रीभवन्तो दयायाश्च देव्यानतेः सज्जनानां च ॥ २० ॥

पुनरपरिमितप्रेमसीमान एते महान्तोऽर्थिताश्चापि भक्तैर्जनैः कामकोटीसुपीठाधिदेव्या महत्युत्सवे मुख्यभूतस्य रम्यस्य चावश्यकत्वं रथ-स्यापि वीक्ष्याथ स भवति न चिरं दारुणाकेवलं निर्मितोऽतोभवेद्राजतोरुक्म-चित्रो रथोऽस्या इतीमे यदावादिपुस्तावतैवेहचाबालगोपालनारीनराश्चापि निःस्वाधनाढ्याश्च अहमहमिकयानैपुरर्थस्यजातं युवानोऽपि वृद्धा रथो रम्य-रूपस्ततोजात रूपः कृतोभूद्विचित्रो यथाकालमाचार्य संदेशभाग्भिः सुशीलै-स्तथाशिल्पिवर्यैश्च समनसि तनुते भावमानन्दथोश्चक्र राजाख्ययानस्य मातु-स्तथानन्दकेतोर्नक्यन्थियुक्तस्य चाम्नाय चक्रस्य वाजीभवत्पूरुषार्थस्य चेरादि षट्सारथेश्चैव ॥ २१ ॥

कनकगिरिसमोऽसौरथः सायुधैः शक्तिकूटैस्तु देदीप्यमानाष्ट पर्वाप्यथैतस्य पूर्वेमणिस्तम्भयुक्ते पुनः [illegible] राख्यमञ्चान्विते सच्चिदानन्द-

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नादात्मिके बिन्दुनाम्नापि विदित इहवुधै रम्यपट्टांशुकैरास्तृतेक्षौमचित्रै-
स्तथा स्पर्शसंवेदकैर्गद्दुकैः सूपधानैर्वितानैः प्रसूनप्रवालप्रभेदैश्च संशोभिते
स्थानमात्मीयमारुह्यराज्ञीतु विचलति ललिता सा स्म कामेशदेवीविजेतुं
यथाभण्डदैत्यं ससैन्यं तथेयं ततोऽभिन्नरूपाकामकोटिस्तु कान्चींगता काम-
कोपादिकानां रिपूणां रजोरूपिणांसत्वगुणकणरहितानां मुहुर्दैत्यसंघातव
ल्लोकसंक्षोभका धर्ममार्गप्रवृत्त्या परात्मस्वरूपावमर्देन चैवानिशं साधुसंपीडकानां
जयाय स्वजैत्रेण यान्ती रथेनेव ॥ २२ ॥

पुनरियदिव संप्रार्थ्यसे देवि दास्यं गतेनामुना ते जनेन श्रुतिस्ते
तु पुत्रीस्मृतिस्तत्सुतास्ते पुराणेतिहासदिरस्तीह नप्तुस्तु वर्गः तथाप्यद्य-
पाश्चात्यविद्यासुसक्ता द्विजास्तान्नाद्दत्य विरहितनिजसद्धर्मवर्माण एनेऽर्थ
कामैकलक्ष्याश्च्युताः स्थानतोऽन्यानपि च्यावयन्तो भवन्ति स्थितिस्थाप-
काश्चपि भूपा न सन्ति प्रमाणं न शस्त्रं न धर्मे प्रवृत्तिर्निवृत्तौ विवेकोऽपि ।
तदिदमखिलमेवाद्य जानासि कौटिल्यभाजः कलेश्चेष्टितं सर्वकालात्मिका
सर्वविच्चासिसर्वान्तरात्मा मनोरूपयानेन यान्ती त्वमेवासि मातस्त्वमेवाद्य
शक्ता यथावद्विधातुं च । भवतु भवतु वर्षः सदा भारतो धर्मनिष्ठो द्विजा
वेदमार्गे निषण्णास्तथालोकतन्त्रप्रवृत्तानिवृत्ताभयात्पक्षपाताच्च नीत्याश्रया
वारिवाहस्तुवर्षी यथाकालमेनोनिवृत्ता जनाश्चैव विगलितरुज एषा रसारूढ-
सस्या सदुग्धा च धेनुः सदैवाम्ब कामक्षि ! कारुण्य पूर्णे तवापाङ्गलेशा-
[10] च्चण्डिके चण्डमुण्डापहेसिह्मपृष्ठाधिरूढे परे भण्डहे ते नमो मातः ॥

× × ×

इति श्रीकाञ्ची पच्चैयप्पकलाशाला संस्कृतपण्डितेन. ति. रा. महा-
लिङ्गशर्माणाविरश्चितः श्रीकामाक्षीविजयविलासदण्डकः सम्पूर्णः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्री भगवत्पादाष्टोत्तरशतनामावलिः ॥

ओं श्री शङ्कराचार्यवर्याय	नमः	ओं वेदवेदान्ततत्त्वज्ञाय	नमः
,, ब्रह्मज्ञानप्रदायकाय	,,	,, दुर्वादिमतखण्डनाय	,,
,, अज्ञानतिमिरादित्याय	,,	,, वैराग्यनिरताय	,,
,, सुज्ञानाम्बुधिचन्द्रमसे	,,	,, शान्ताय	,,
,, वर्णाश्रमप्रतिष्ठात्रे	,,	,, संसारार्णवतारकाय	,,
,, श्रीमते	,,	,, प्रसन्नवदनाम्भोजाय	,,
,, मुक्तिप्रदायकाय	,,	,, परमार्थप्रकाशकाय	,,
,, शिष्योपदेशनिरताय	,,	,, पुराणस्मृतिसारज्ञाय	,,
,, भक्ताभीष्टप्रदायकाय	,,	,, नित्यतृप्ताय	,,
,, सूक्ष्मतत्त्वरहस्यज्ञाय	,,	,, महते	,,
,, कार्याकार्यप्रबोधकाय	,,	,, शुचये	,,
,, ज्ञानमुद्राञ्चितकराय	,,	,, नित्यानन्दाय	,,
,, शिष्यहृत्तापहारकाय	,,	,, निरातङ्काय	,,
,, पारिव्राज्यश्रमोद्धर्त्रे	,,	,, निःसङ्गाय	,,
,, सर्वेतन्त्रस्वतन्त्रधिये	,,	,, निर्मलात्मकाय	,,
,, अद्वैतस्थापनाचार्याय	,,	,, निर्ममाय	,,
,, साक्षाच्छङ्कररूपभृते	,,	,, निरहङ्काराय	,,
,, षण्मतस्थापनाचार्याय	,,	,, विश्ववन्द्यपदाम्बुजाय	,,
,, त्रयीमार्गप्रकाशकाय	,,	,, सत्त्वप्रधानाय	,,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ओं सद्भावाय नमः
,, संख्यातीतगुणोज्वलाय ,,
,, अनघाय ,,
,, सारहृदयाय ,,
,, सुधिये ,,
,, सारस्वतप्रदाय ,,
,, सत्यात्मने ,,
,, पुण्यशीलाय ,,
,, संख्यायोगविचक्षणाय ,,
,, तपोराशये ,,
,, महातेजसे ,,
,, गुणात्रयविभागविदे ,,
,, कलिघ्नाय ,,
,, कालधर्मज्ञाय ,,
,, तमोगुणनिवारकाय ,,
,, भगवते ,,
,, भारतीजेत्रे ,,
,, शारदाह्वानपण्डिताय ,,
,, धर्माधर्मविभागज्ञाय ,,
,, लक्ष्यभेदप्रदर्शकाय ,,
,, नादबिन्दुकलाभिज्ञाय ,,
,, योगिहृत्पद्मभास्कराय ,,
,, अतीन्द्रियज्ञाननिधये ,,
,, नित्यानित्यविवेकवते नमः
,, चिदानन्दाय ,,
,, चिन्मयात्मने ,,
,, परकायप्रवेशकृते ,,
,, अमानुषचरित्राढ्याय ,,
,, क्षेमदायिने ,,
ओं क्षमाकराय ,,
,, भव्याय ,,
,, भद्रप्रदाय ,,
,, भूरिमहिम्ने ,,
,, विश्वरञ्जकाय ,,
,, स्वप्रकाशाय ,,
,, सदाधाराय ,,
,, विश्वबन्धवे ,,
,, शुभोदयाय ,,
,, विशालकीर्तये ,,
,, वागीशाय ,,
,, सर्वलोकहितोत्सुकाय ,,
,, कैलासयात्रासंप्राप्त-
चन्द्रमौलिप्रपूजकाय ,,
,, काञ्च्यां श्रीचक्रराजाख्य
यन्त्रस्थापनदीक्षिताय ,,
,, श्रीचक्रात्मकताटङ्क-

Funding by IKS-MOE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पोषिताम्बामनोरथाय नमः
,, श्रीब्रह्मसूत्रोपनिष-
ब्भाष्यादि ग्रन्थकल्प-
काय ,,
,, चतुर्दिक् चतुराम्नाय
प्रतिष्ठात्रे ,,
,, महामतये ,,
,, द्विसप्ततिममोच्छेत्रे ,,
,, सर्वदिग्विजयप्रभवे ,,
ओं काषायवसनोपेताय नमः
,, भस्मोद्धूलित-
विग्रहाय ,,
,, ज्ञानात्मैकदण्डाढ्याय ,,
,, कमण्डलुलसत्कराय ,,
,, व्याससदर्शनप्रीताय ,,
,, भगवत्पादसंज्ञकाय ,,
,, चतुःषष्टिकलाभिज्ञाय ,,
,, ब्रह्मराक्षसतोषकाय नमः
,, सौन्दर्यलहरीमुख्यबहु-
स्तोत्रविधायकाय ,,
,, श्रीमन्मण्डनमिश्राख्य-
स्वयंभूजयसन्नुताय ,,
,, तोटकाचार्यसंपूज्याय ,,
,, पद्मपादार्चिताङ्घ्रिकाय ,,
,, हस्तामलकयोगीन्द्र-
ब्रह्मज्ञानप्रदायकाय ,,
,, निर्व्याजकरुणामूर्तये ,,
,, जगत्पूज्याय ,,
,, जगद्गुरवे ,,
,, भेरीपटहवाद्यादिराज-
लक्षणलक्षिताय ,,
,, सकृत्स्मरणसन्तुष्टाय ,,
,, सर्वज्ञाय ,,
,, ज्ञानदायकाय नमः

श्री शङ्करभगवत्पादाय नमः अष्टोत्तरशतनामार्चनां समर्पयामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

जगद्गुरूणामष्टोत्तरशतनामानि

श्रीचन्द्रशेखरेन्द्रास्मदाचार्याय नमो नमः ।
श्रीचन्द्रमौलिपादाब्जमधुपाय ,,
आचार्यपादाधिष्ठानाभिषिक्ताय ,,
सर्वज्ञाचार्यभगवत्स्वरूपाय ,,
अष्टाङ्गयोगनिष्ठायां गरिष्ठाय ,,
सनकादिमहायोगिसदृशाय ,,
महादेवेन्द्रहस्ताब्जसञ्जाताय ,,
महायोगिविनिर्णेयमहत्त्वाय ,,
कामकोटिमहापीठाधीश्वराय ,,
कलिदोषनिवृत्त्येकारणाय ,, १०
श्रीशङ्करपदाम्भोजचिन्तकाय ,,
भारतीकृतजिवाग्नर्तनाय ,,
करुणारसकल्लोलकटाक्षाय ,,
कान्तिनिर्जितसूर्येन्दुकभ्राभाय ,,
अमन्दानन्दकृन्मन्दगमनाय ,,
अद्वैतानन्दभरितचिद्रूपाय ,,
कटीतटलसच्चारुकाषायाय ,,
कटाक्षमात्रमोक्षेच्छाजनकाय ,,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाहुदण्डलसद्वेणुसुदण्डाय नमो नमः ।
फालभागलसद्भूतिपुण्ड्रकाय ,, २०
दरहासस्फुरद्दिव्यमुखाब्जाय ,,
सुधामधुरसन्मञ्जुभाषणाय ,,
तपनीयतिरस्कारिशरीराय ,,
तपःप्रभाविराजत्स्वशरीराय ,,
सङ्गीतानन्दसन्दोहसर्वस्वाय ,,
संसाराम्बुधिनिर्मग्नतारकाय ,,
मस्तकोल्लासिरुद्राक्षमकुटाय ,,
साक्षात्परशिवामोघदर्शनाय ,,
चक्षुर्गतमहातेजोऽत्युज्ज्वलाय ,,
साक्षाद्गतजगन्मातृस्वरूपाय ,, ३०
क्वचिद्बालजनात्यन्तसुलभाय ,,
क्वचिन्महाजनातीवदुष्प्रापाय ,,
गोब्राह्मणहितासक्तमानसाय ,,
गुरुमण्डलसंभाव्यविदेहाय ,,
भावनामात्रसन्तुष्टहृदयाय ,,
भाग्यादिभाव्यदिव्यश्रीपदाब्जाय ,,
व्यक्ताव्यक्ततरानेकचित्कलाय ,,
रक्तशुक्लप्रभामिश्रपादुकाय ,,
भक्तमानसराजीवभवनाय ,,
भक्तलोचनपद्मौघभास्कराय ,, ४०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भक्तकामलताकल्पपादपाय नमो नमः ।
मुक्तिमुक्तिप्रदानेकशक्तिदाय ,,
शरणागतदीनार्तरक्षकाय ,,
शमादिषट्कसंपत्प्रदायकाय ,,
सर्वदा सर्वथा लोकसौख्यदाय ,,
सदा नवनवाकाङ्क्ष्यदर्शनाय ,,
सर्वहृत्पद्मसञ्चारनिपुणाय ,,
सर्वेङ्गितपरिज्ञानसमर्थाय ,,
स्वप्नदर्शनभक्तेष्टसिद्धिदाय ,,
सर्ववस्तुविभाव्यात्मसद्रूपाय ,, ५०
दीनभक्तावनैकान्तदीक्षिताय ,,
ज्ञानयोगबलैश्वर्यमानिताय ,,
भावमाधुर्यकलिताभयदाय ,,
सर्वभूतगणामेयसौहार्दाय ,,
मूकीभूतानेकलोकवाक्प्रदाय ,,
शीतलीकृतहृत्तापसेवकाय ,,
भोगमोक्षप्रदानेकयोगज्ञाय ,,
शीघ्रसिद्धिकरानेकशिक्षणाय ,,
अमानित्वादिमुख्यार्थसिद्धिदाय ,,
अखण्डैकरसानन्दप्रबोधाय ,, ६०
नित्यानित्यविवेकप्रदायकाय ,,
प्रत्यक्षितरसाखण्डचित्सुखाय ,,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इहामुत्रार्थवैराग्यसिद्धिदाय नमो नमः ।
महामोहनिवृत्त्यर्थमन्त्रदाय ,,
क्षेत्रक्षेत्रज्ञविषयदृष्टिदाय ,,
क्षयवृद्धिविहीनात्मसौख्यदाय ,,
तूलज्ञानविहीनात्मतृप्तिदाय ,,
मूलाज्ञानाबाधितात्ममुक्तिदाय ,,
भ्रान्तिमेघोच्चाटनप्रभञ्जनाय ,,
शान्तिवृष्टिप्रदामोघजलदाय ,, ७०
एककालकृतानेकदर्शनाय ,,
एकान्तभक्तसंवेद्यस्वगताय ,,
श्रीचक्ररथनिर्माणसुप्रथाय ,,
श्रीकल्याणतरामेयसुश्लोकाय ,,
आश्रिताश्रयणीयत्वप्रापकाय ,,
अखिलाण्डेश्वरीकर्णभूषकाय ,,
सशिष्यगणयात्राविधायकाय ,,
साधुसङ्घनुताऽमेयचरणाय ,,
अभिन्नात्मैक्यविज्ञानप्रबोधाय ,,
भिन्नभिन्नमतैश्चाभिपूजिताय ,,
तत्तद्विपाकसद्बोधदायकाय ,,
तत्तद्भापाप्रकटितस्वगीताय ,,
तत्रतत्रकृतानेकसत्कार्याय ,,
चित्रचित्रप्रभावप्रसिद्धिगाय ,,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकानुग्रहकृत्कर्मनिष्ठिताय नमो नमः ।
लोकोद्धर्तृमहद्भूरिनियमाय ,,
सर्ववेदान्तसिद्धान्तसम्मताय ,,
कर्मब्रह्मात्मकरणमर्मज्ञाय ,,
वर्णाश्रमसदाचाररक्षकाय ,,
धर्मार्थकाममोक्षप्रदायकाय ,, ९०
पदवाक्यप्रमाणादिपारीणाय ,,
पादमूलनतानेकपण्डिताय ,,
वेदशास्त्रार्थसद्गोष्ठीविलासाय ,,
वेदशास्त्रपुराणादिविचाराय ,,
वेदवेदाङ्गतत्वप्रबोधकाय ,,
वेदमार्गप्रमाणप्रख्यापकाय ,,
निर्निद्रतेजोविजितनिद्राद्याय ,,
निरन्तरमहानन्दसम्पूर्णाय ,,
स्वभावमधुरोदारगांभीर्याय ,,
सहजानन्दसम्पूर्णसागराय ,, १००
नादबिन्दुकलातीतवैभवाय ,,
वादभेदविहीनात्मबोधदाय ,,
द्वादशान्तमहापीठनिषण्णाय ,,
देशकालापरिच्छिन्नदृग्रूपाय ,,
निर्मानशान्तिमहितनिश्चलाय ,,
निर्लक्ष्यलक्ष्यसंलक्ष्यनिलेपाय ,,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीषोडशान्तकमलसुस्थिताय नमो नमः ।
श्रीचन्द्रशेखरेन्द्रश्रीसरस्वत्यै ,, १०८

फुलश्रुतिः

इत्येतद्गुरुदेवस्य नाम्नामष्टोत्तरं शतम् ।
पठनात् पूजनाद्ध्यानाद्भक्तानामिष्टसिद्धिदम् ॥
सर्वं श्रीगुरुदेवतार्पणमस्तु ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

श्रीललिताष्टोत्तरशतनामावलिः

ओ रजताचलशृङ्गाग्र मद्ध्यस्थायै नमो नमः
हिमाचलमहावंश पावनायै नमो नमः
शङ्करार्धाङ्गसौन्दर्य शरीरायै नमो नमः
लसन्मरकतस्वच्छ विग्रहायै नमो नमः
महातिशयसौन्दर्य लावण्यायै नमो नमः
शशांङ्कशेखरप्राण वल्लभायै नमो नमः
सदापञ्चदशात्मैक्य स्वरूपायै नमो नमः
वज्रमाणिक्यकटक किरीटायै नमो नमः
कस्तूरितिलकोद्भासि निटिलायै नमो नमः
भस्मरेखाङ्कितलसन्मस्तकायै नमो नमः
विकचाम्भोरुहदल लोचनायै नमो नमः
शरच्छाम्पेयपुष्पाभ नासिकायै नमो नमः
लसत्कनकताटङ्क युगलायै नमो नमः
मणिदर्पणसङ्काश कपोलायै नमो नमः
ताम्बूलपूरितस्मेर वदनायै नमो नमः
सुपक्वदाडिमीबीज रदनायै नमो नमः
कम्बुपूगसमच्छाय कन्धरायै नमो नमः
स्थूलमुक्ताफलादार सुहारायै नमो नमः

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गिरीराजद्धमाङ्गल्य मङ्गलायै नमो नमः
पद्मपाशाङ्कुशलसत् कराब्जायै नमो नमः
पद्मकैरवमन्दार सुमालिन्यै नमो नमः
सुपर्णकुम्बयुग्माभ सुकुचायै नमो नमः
रमणीयचतुर्बाहु संयुक्तायै नमो नमः
कनकाङ्गदकेयूर भूषितायै नमो नमः
बृहत्सौवर्णसौन्दर्य वसनायै नमो नमः
बृहन्नितंबविलसज्जघनायै नमो नमः
सौभाग्यजातशृङ्गार मध्यमायै नमो नमः
दिव्यभूषणसन्दोह रञ्जितायै नमो नमः
पारिजातगुणाधिक्य पादाब्जायै नमो नमः
सुपद्मराग सङ्काश चरणायै नमो नमः
कामकोटिमहापद्म पीटस्थायै नमो नमः
श्रीकण्ठनेत्रकुमुद चन्द्रिकायै नमो नमः
सचामररमावाणी वीजितायै नमो नमः
भक्तरक्षणदाक्षिण्य कटाक्षायै नमो नमः
भूतेशालिङ्गनोद्भूत पुलकाङ्गयै नमो नमः
अनङ्गजनकापाङ्ग वीक्षणायै नमो नमः
ब्रह्मोपेन्द्रशिरोरत्न रञ्जितायै नमो नमः
शचीमुखामरवधू सेवितायै नमो नमः
लीलाकल्पितब्रह्माण्ड मण्डलायै नमो नमः
अमृतादिमहाशक्ति संवृतायै नमो नमः
एकातपत्रसाम्राज्य दायिकायै नमो नमः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सनकादिसमाराध्य पादुकायै नमो नमः
देवर्षिभिस्तूयमान वैभवायै नमो नमः
कलशोद्भवदुर्वास पूजितायै नमो नमः
मत्तेभवक्त्रषड्वक्त्र वत्सलायै नमो नमः
चक्रराजमहायन्त्र मध्यवर्त्यै नमो नमः
चिदग्निकुण्डसंभूत सुदेहायै नमो नमः
शशाङ्कखण्डसंयुक्त मकुटायै नमो नमः
मत्तहंसवधूमन्दगमनायै नमो नमः
वन्दारुजनसन्दोह वन्दितायै नमो नमः
अन्तर्मुखजनानन्द फलदायै नमो नमः
पतिव्रताङ्गनाभीष्ट फलदायै नमो नमः
अव्याजकरुणापूर पूरितायै नमो नमः
नितान्तसच्चिदानन्द संयुक्तायै नमो नमः
सहस्रसूर्यसंयुक्त प्रकाशायै नमो नमः
रत्नचिन्तामणिगृह मध्यस्थायै नमो नमः
हानिवृद्धिगुणाधिक्य रहितायै नमो नमः
महापद्माटवीमध्य निवासायै नमो नमः
जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः
महातापौघपापानां विनाशिन्यै नमो नमः
दुष्टभीतिमहाभीति भञ्जनायै नमो नमः
समस्तदेवदनुज प्रेरकायै नमो नमः
समस्तहृदयांबोज निलयायै नमो नमः
अनाहतमहापद्म मन्दिरायै नमो नमः

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सहस्रारसरोजात वासितायै नमो नमः
पुनरावृत्तिरहित पुरस्थायै नमो नमः
वाणीगायत्रीसावित्री सन्नुतायैनमो नमः
रमाभूमिसुताराध्य पदाब्जायै नमो नमः
लोपामुद्रार्चितश्रीमच्चारणायै नमो नमः
सहस्ररतिसौन्दर्य शरीरायैनमो नमः
भावनामात्रसन्तुष्ट हृदयायै नमो नमः
सत्यसंपूर्ण विज्ञान सिद्धिदायै नमो नमः
त्रिलोचनकृतोल्लास फलदायै नमो नमः
श्रीसुधाब्धिमणिद्वीप मध्यगायै नमो नमः
दक्षाध्वरविनिर्भेद साधनायै नमो नमः
श्रीनाथसोदरीभूत शोभितायै नमो नमः
चन्द्रशेखरभक्तार्ति भञ्जनायै नमो नमः
सर्वोपाधिविनिर्मुक्त चैतन्यायै नमो नमः
नामपारायणाभीष्ट फलदायै नमो नमः
सृष्टिस्थितितिरोधान सङ्कल्पायै नमो नमः
श्रीषोडशाक्षरीमन्त्र मध्यगायै नमो नमः
अनाद्यन्तस्वयंभूत दिव्यमूर्त्यै नमो नमः
भक्तहंसपरीमुख्य वियोगायै नमो नमः
मातृमण्डलसंयुक्त ललितायै नमो नमः
भण्डदैत्यमहासत्व नाशनायै नमो नमः
क्रूरभण्डशिरच्छेद निपुणायै नमो नमः
धराच्युतसुराधीश सुखदायै नमो नमः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चण्डमुण्डनिशुंभादि खण्डनायै नमो नमः
रक्ताक्षरक्तजिह्वादि शिक्षणायै नमो नमः
महिषासुरदोर्वीर्य निग्रहायै नमो नमः
अभ्रकेशमहोत्साह करणायै नमो नमः
महेशयुक्तनटन तत्परायै नमो नमः
निजभर्तृमुखांबोज चिन्तनायै नमो नमः
वृषभध्वजविज्ञान भावनायै नमो नमः
जन्ममृत्युजरायोग भञ्जनायै नमो नमः
विधेहमुक्तिविज्ञान सिद्धिदायै नमो नमः
कामक्रोधादिषड्वर्ग नाशनायै नमो नमः
राजराजार्चितपद सरोजायै नमो नमः
सर्ववेदान्तसिद्धान्त सुतत्वायै नमो नमः
श्रीवीरभक्तविज्ञान निदानायै नमो नमः
अशेषदुष्टदनुज सूदनायै नमो नमः
साक्षाच्छ्रीदक्षिणामूर्ति मनोज्ञायै नमो नमः
महामेदाग्रसंपूज्य महिमायै नमो नमः
दक्षप्रजापतिसुत वेषाढ्यायै नमो नमः
सुमवाणेक्षुकोदण्ड मण्डितायै नमो नमः
नित्ययौवनमाङ्गल्य मङ्गलायै नमो नमः
महादेवसमायुक्त महादेव्यै नमो नमः
चतुर्विंशतितत्त्वैक स्वरूपायै नमो नमः

श्रीललिताष्टोत्तरशत संपूर्णम्

Lawan's Sri Sankarachary Sanskrit
Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Shri T.R. Mahalinga Sarma, the author of this Book is an erudite Sanskrit Scholar who had his training in the classical literature and Sastras in that language under distinguished savants of south India.

He dedicated his life to the propagation of Sanskrit learning and has taught in several schools. After retirement, he is utilising the years of his well-earned rest in the pursuit of his favourite studies.

Shri Sarma, who is Sahitya Siromani is a gifted Sanskrit Poet who can compose poems with ease and elegance. The two pieces which have gone into this book, Satasloki Sankara Vijaya and Sri Kamakshi Vijaya Vilasa Dandakam bear ample evidence of his powers of poesy. The first work is a distilled version of several Sankara Vijayas. The second which is in praise of the Goddess Kamakshi of Kanchi is in Dandaka metre after Kalidasa's Syamala Dandakam and brings out among other things, the close connection between Sri Kamakshi and shri Kamakoti Peetha.

Shri Mahalinga Sarma has also condensed the Mahabharata in a brief compass without omitting anything relevant material.

Shri Sarma is also a composer in music in the Sanskrit language. His songs are a happy blend of scholarly Sahitya and sweet sangeetha. It is to be hoped that he will find the time and the means to publish them before long.

Funding by IKS-MoE